श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासमहादेशिक (आक्कूर् आण्डवन्) मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासमहादेशिक (आक्कूर् आण्डवन्) मङ्गळम् ॥

ज्ञानभक्तिविरक्त्यादि कल्याणगुणशेवधिः।
श्रीनिवासयतीन्द्रो मे सन्निधत्तां सदा हृदि ॥ 1 ॥

वेदान्तलक्ष्मणमुनेः प्राप्तवेदान्तसम्पदे।
श्रीनिवासमुनीन्द्राय देशिकायास्तु मङ्गळम् ॥ 2 ॥

रहस्यत्रयभाष्यादिग्रन्थसारार्थवेदिने।
हेमाब्जसमनेत्राय यतिवर्याय मङ्गळम् ॥ 3 ॥

दुर्वादिगजसिंहाय प्रपन्नजनबन्धवे।
सर्वतन्त्रस्वतन्त्राय सर्वज्ञायास्तु मङ्गळम् ॥ 4 ॥

श्रीमुनित्रयसिद्धान्तस्थापकाय महात्मने।
शुचये साधुसेव्याय गुरुमुख्याय मङ्गळम् ॥ 5 ॥

कन्यामास्युत्तरप्रोष्ठपदोडुनि शुभान्विते।
विक्रमे रत्नगर्भायामवतीर्णाय मङ्गळम् ॥ 6 ॥

ज्ञानवारिधिवेदान्तलक्ष्मणाह्वययोगिना।
हस्त्यद्रीशपदाम्भोजे न्यस्तभाराय मङ्गळम् ॥ 7 ॥

ज्ञानानुष्ठानवैराग्यशान्तिदान्तिदयाब्धये।
ज्ञानप्रदात्रे छात्राणां निर्ममायास्तु मङ्गळम् ॥ 8 ॥

संसारसागरे मग्नान्दीनानुद्धर्तुमिच्छते।
अवतीर्योत्तारयते मुक्तिदायास्तु मङ्गळम्॥ 9॥

लसत्त्रिदण्दहस्ताय सूर्ध्वपुण्ड्रविशोभिने।
सितयज्ञोपवीताय गुरवे भूरि मङ्गळम्॥ 10॥

भगवच्चरणांभोजमानसाय जितात्मने।
प्रत्यहं षड्गुरूपानत्पूजकायास्तु मङ्गळम्॥ 11॥

रङ्गादिक्षेत्रभगवत्सेवासन्तुष्टचेतसे।
आर्ताश्रितजनत्राणदीक्षितायास्तु मङ्गळम्॥ 12॥

यस्यानुग्रहलेशेन मन्दोपि प्राज्ञतामियात्।
तस्मै श्री श्रीनिवासाख्य देशिकेन्द्राय मङ्गळम्॥ 13॥

तद्देशिककटाक्षेण रचितं गुरुमङ्गळम्।
यः पठेच्छ्रद्धया सोऽपि भवेन्मङ्गळभाजनम्॥ 14॥

वेदान्तरामानुजसंयमीन्द्रो
नतार्तिहा यस्य गुरूत्तमोऽभूत्।
श्रीपादुकासेवकलक्ष्मणाख्यः
प्राचार्य आसीत्स चिराय जीयात्॥ 15॥

॥ इति श्री श्रीनिवासमहादेशिक मङ्गळं समाप्तम्॥